मुनेर्मताः”। द्विविधं मानम्। “उत्तमाधमभेदेन मानं तद्द्विविधं भवेत्। इति प्रोक्तानि सूत्राणि खड्गानां ज्ञानहेतवे। एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः” सूत्राध्यायः। “तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत”। लौहदीपे “रुप्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते। ऊर्द्ध्वं तत्तु महामूल्यं रुप्यवज्रमुशन्ति तम्। एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम् १। स्वर्णरेखावली तन्वी यद्भूमौ निकषोपमा। स्वर्णवज्रमिति प्राहुरायुर्लक्ष्मीजयप्रदम् २। गजशुण्डाकृतिर्भूमौ कृष्णायामङ्गसम्भवः। गजवज्रमिति प्राहुरक्तस्पर्शे तु तद्विशेत्। ज्वरादिव्याधिशमनं तस्य प्रक्षालनाम्भसा। अपिक्षीणोपि भूपालस्तद्वीर्य्यात् साधयेन्महीम् ३। एरण्डवीजप्रतिममङ्गं भूमिः सितेतरा। उर्वारुकमिदं नाम्ना शत्रुदर्पक्षयङ्करः। एतस्य स्पर्शमात्रेण नरः सम्यग्विमुच्यते। महिषाख्यमिदं वज्रं केचिदाहुर्मनीषिणः ४। अङ्गं दमनपत्राभं खड्गे यस्मिन् प्रतीयते। विद्याद्दमनवज्रञ्च तज्ज्ञेयं द्विविधं बुधैः। नीला शुभ्रा भवेद्भूमिस्तत्र नीला गरीयसी। तस्मिन् पर्य्युषितं तोयं गन्धे दमनकोपमम्। तत्प्रभावान् महीपालः कृत्स्नां पृथ्वीं हि साधयेत्” ५। शार्ङ्गधरीये “एका स्थूला सिता रेखा भूमिर्न्नीला दृढ़ा यदि। स्थूलाङ्गमङ्ग वज्रं तद्विद्याल्लक्ष्मीयशःप्रदम्। एतत्क्षते भवेच्छोथः स्थूलश्चिरतरस्थितिः। एतं महान्तमपरे वदन्ति खड्गकोविदाः ६। दृष्टायां दृश्यते भूमौ अङ्गञ्च प्रतिविम्बितम्। अङ्गवज्रं भवेत्तस्य द्विधा भूमिः सिताऽसिता ७। लौहप्रदीपे “निरङ्गं रुप्यपत्राभमीषन्नृमणिनिभञ्च यत्। दुर्लभं तन्महामूल्यं कान्तलौहं प्रचक्षते। कृष्णा भूमिर्भवेत् स्वच्छा पीता वज्राङ्गसंङ्गता। कृष्णवज्रमिति प्राहुस्तत्क्षते मोह उच्यते। कृष्णा भूमिः सुवर्णाभमीषच्छुक्लाङ्गसङ्कुतम्। डाङ्गलीवज्रकं विद्यात् कालसंज्ञमथापरे ८। अरुणं सूक्ष्ममूर्द्धञ्चेदङ्गं भूमिः सितेतरा। अरुणाख्यमिदं वज्रं शत्रुदर्पनिसूदनम्। सूर्य्यांशुस्पर्शमात्रेण वह्निरूपां वहेत् शिखाम्। तस्य स्पर्शनमात्रेण पद्मकोषः स्फुटेन्निशि। दुर्लभं तन्मनुष्याणां भाग्यैः कुत्रापि लभ्यते। तद्द्योजनसहस्रस्यारिष्टं नाशयति ध्रुवम् ९। श्वेतास्तिस्रो यदा रेखा आमूलादुपलक्षिताः। श्वेताङ्गमिति तद्विद्यादृयशोलक्ष्मीबलप्रदम् १०। अम्भोजदलसङ्काशमङ्गं भूमिः सितेतरा। अम्भोजवज्रं तज्ज्ञेयं कथितं मुनिपुङ्गवैः ११। अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा। गदावज्रमिदं ब्रूयात् तत्क्षते शूलसम्भवः १२। अङ्गं कृष्णतिलाकारं भूमिश्चैव सिताऽसिता। तिलवज्रमिदं ज्ञेयं लक्ष्मीबलयशःप्रदम्। तत्क्षते तिलतैलाभा वसा प्रचरवतेऽधिकम् १३। धूम्रवर्णा भवेद्भूमिरङ्गं वह्निशिखोपमम्। अग्निवज्रमिदं ज्ञेयं शत्रूणां दाहकारकम्। अत्र शीतोदकं न्यस्तं तप्तं भवति च क्षणात्। शाणे वह्निं वमेद्यस्तु तथा सूर्य्यांशुसङ्गमात्। तत्क्षते बलवान् दाहो दग्धवच्च व्रणो भवेत्। एतत् परमभाग्येन लभ्यते धरणीतले १४। भूमिः सिताऽसिता वापि अङ्गञ्चेत् पिप्पलीप्रभम्। कणावज्रमिदं ज्ञेयमन्तर्दाहस्तु तत्क्षते १५। कृष्णा भूमिर्यदीयाङ्गे दृश्यते ग्रन्थिसञ्चयः। ग्रन्थिवज्रमिदं ज्ञेयं वैरिपक्षविनाशनम्। तत्क्षते बलवान् दाह स्तृषा च ज्वर एव च १६। शालपर्णीदलाकारमङ्गं कृष्णासिपुत्रिका। स्थिरावज्रमिदं प्राहुस्तत्क्षते वेपथुर्भवेत् १७। यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा। एतत्तित्तिरिवज्रं स्यात् तत्क्षते बहुघर्म्मकम् १८। वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते। मालाङ्गवज्रं तद्विद्यात्तत्तोयं गन्धवद्भवेत्। अत्र तप्तोदकं न्यस्तं शीतं भवति तत्क्षणात्। एष दाहपरीतानामतिपित्तहतात्मनाम्। भवेत् परमभैषज्यं भाग्येनैतद्धि लभ्यते १९। यदा जीवकसङ्काशमङ्गं भूमिः सिताऽसिता। एतज्जीवकवज्रं स्यात् तत्क्षते तत्क्षणाज्ज्वरः २०। भूमिः सिताऽसिता चेत्ते स्यादङ्गं भृङ्गाभमिष्यते। तत्र चेन्मधु विन्यस्तं शोषमाप्नोति केवलम्। एतद्भ्रमरवज्रं स्यात्तत्क्षते स्याद्विसूचिका २१। ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते। ऊर्द्ध्ववज्रमिदं प्राहुर्विषवेगनिसूदनम्”। लौहप्रदीपे “ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते। लाङ्गलाङ्गन्तु तद्विद्यात् स्पर्शे तस्याऽहिनाशनम् २२। अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा। मरिचाङ्गमिदं वज्रं तत्क्षते कटुरक्तता। तत्प्रक्षालनतोयेन नश्यन्ति पीनसादयः २३। यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला। भुजङ्गवज्रं तद्विद्यात्तत्क्षते विषवद्रुजा।